### (2) चित्रलेखा

Def. मन्दाक्रान्ता नपरलघुयुता कीर्तिता चित्रलेखा ।
Sch. G. म, भ, न, य, य, य (4. 7. 7).
Ex. शङ्केऽमुष्मिन् जगति मृगदृशां साररूपं यदासी-
दाकृष्येदं व्रजयुवतिसभा वेधसा सा व्यधायि ।
नैतादृक् चेत् कथमुदधिसुतामन्तरेणाच्युतस्य
प्रीतं तस्या नयनयुगमभूच्चित्रलेखाद्भुतायाम् ॥

### (3) नन्दन

Def. नजभजरैस्तु रेफसहितैः शिवैर्हयैर्नन्दनम् ।
Sch. G. न, ज, भ, ज, र, र (11. 7).
Ex. तरणिसुतातरङ्गपवनैः सलीलमान्दोलितं
मधुरिपुपादपङ्कजरजःसुपूतपृथ्वीतलम् ।
मुरहरचित्रचेष्टितकलाकलापसंस्मारकं
क्षितितलनन्दनं व्रज सखे सुखाय वृन्दावनम् ॥

### (4) नाराच

Def. इह ननरचतुष्कसृष्टं तु नाराचमाचक्षते ।
Sch. G. न, न, र, र, र, र (8. 5. 5).
Ex. रघुपतिरपि जातवेदोविशुद्धां प्रगृह्य प्रियां
प्रियसुहृदि विभीषणे संगमय्य श्रियं वैरिणः ।
रविसुतसहितेन तेनानुयातः ससौमित्रिणा
भुजविजितविमानरत्नाधिरूढः प्रतस्थे पुरीम् ॥
R. 12. 104

### (5) शार्दूलललित

Def. मः सो जः सतसा दिनेशऋतुभिः शार्दूलललितम् ।
Sch. G. म, स, ज, स, त, स (12. 6).
Ex. कृत्वा कंसमृगे पराक्रमविधिं शार्दूलललितं
यश्चक्रे क्षितिभारकारिषु दरं चैद्यप्रभृतिषु ।
संतोषं परमं तु देवनिवहे त्रैलोक्यशरणं
श्रेयो नः स तनोत्वपारमहिमा लक्ष्मीप्रियतमः ॥

---

*Metres with 19 Syllables in a quarter*

## (अतिधृति)

### (1) मेघविस्फूर्जिता

Def. रसर्त्वश्वैर्यमौ न्सौ ररगुरुयुतौ मेघविस्फूर्जिता स्यात् ।
Sch. G. य, म, न, स, र, र, ग (6. 6. 7).
Ex. कदम्बामोदाढ्या विपिनपवनाः केकिनः कान्तकेका
विनिद्राः कन्दल्यो दिशि दिशि मुदा दर्दुरा दृप्तनादाः ।
निशा नृत्यद्विद्युद्विलसितलसन्मेघविस्फूर्जिता चेत्
प्रियः स्वाधीनोऽसौ दनुजदलनो राज्यमस्मात् किमन्यत् ॥

### (2) शार्दूलविक्रीडित

Def. सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम् ।
Sch. G. म, स, ज, स, त, त, ग (12. 7).
Ex. वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः ।
अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते
स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः ॥
V. 1. 1.

### (3) सुमधुरा

Def. म्रौ भ्नौ मो नो गुरुश्चेद् हयऋतुरसैरुक्ता सुमधुरा ।
Sch. G. म, र, भ, न, म, न, ग (7. 6. 6).
Ex. वेदार्थान् प्राकृतस्त्वं वदसि न च ते जिह्वा निपातिता
मध्याह्ने वीक्षसेऽर्कं न तव सहसा दृष्टिर्विचलिता ।
दीप्ताग्नौ पाणिमन्तः क्षिपसि स च ते दग्धो भवति नो
चारित्र्याच्चारुदत्तं चलयसि न ते देहं हरति भूः ॥
Mk. 9. 21.

### (4) सुरसा

Def. म्रौ भ्नौ यो नो गुरुश्चेत् स्वरमुनिकरणैराह सुरसाम् ।
Sch. G. म, र, भ, न, य, न, ग (7. 7. 5).
Ex. कामक्रीडासतृष्णो मधुसमयसमारम्भरभसात्
कालिन्दीकूलकुञ्जे विहरणकुतुकाकृष्टहृदयः ।
गोविन्दो बल्लवीनामधररससुधां प्राप्य सुरसां
शङ्के पीयूषपानैः प्रचुरकृतसुखं व्यस्मरदसौ ॥

---

*Metres with 20 Syllables in a quarter*

## (कृति)

### (1) गीतिका

Def. सजजा भरौ सलगा यदा कथिता तदा खलु गीतिका ।
Sch. G. स, ज, ज, भ, र, स, ल, ग (5. 7. 8).
Ex. करतालचञ्चलकङ्कणस्वनमिश्रणेन मनोरमा
रमणीयवेणुनिनादरङ्गिमसंगमेन सुखावहा ।
बहलानुरागनिवासरासससमुद्भवा भवरागिणं
विदधौ हरिं खलु वल्लवीजनचारुचामरगीतिका ॥

### (2) सुवदना

Def. ज्ञेया सप्ताश्वषड्भिर्मरभनययुता भ्लौ गः सुवदना ।
Sch. G. म, र, भ, न, य, भ, ल, ग (7. 7. 6).
Ex. उत्तुङ्गास्तुङ्गकूलं स्रुतमदसलिलाः प्रस्यन्दिसलिलं
श्यामाः श्यामोपकण्ठद्रुममतिमुखराः कल्लोलमुखरम् ।
स्रोतः खातावसीदत्तटमुरुदशनैरुत्सादिततटाः
शोणं सिन्दूरशोणा मम गजपतयः पास्यन्ति शतशः ॥
Mu. 4. 16.

---

*Metres with 21 Syllables in a quarter*

## (प्रकृति)

### (1) पञ्चकावली

(Also called सरसी, धृतश्री)

Def. नजभजजा जरौ नरपते कथिता भुवि पञ्चकावली ।
Sch. G. न, ज, भ, ज, ज, ज, र (7. 7. 7).
Ex. तुरगशताकुलस्य परितः परमेकतुरङ्गजन्मनः
प्रमथितभूभृतः प्रतिपथं मथितस्य भृशं महीभृता ।
परिचलतो बलानुजबलस्य पुरः सततं धृतश्रिय-
श्चिरगलितश्रियो जलनिधेश्च तदाऽभवदन्तरं महत् ॥
Si. 3. 82.